कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥ अथ द्वितीय काण्डे पञ्चमः प्रश्नः॥

हरिः ओम्॥ विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीथ्स्वस्रीयोऽसुराणां तस्य त्रीणि शीर्षाण्यासन्थ्सोमपानग्ं सुरापानमन्नादनग्ं स प्रत्यक्षं देवेभ्यो भागमवदत्परोऽक्षमसुरेभ्यः सर्वस्मै वै प्रत्यक्षं भागं वदन्ति यस्मा एव परोऽक्षं वदन्ति तस्य भाग उदितस्तस्मादिन्द्रोऽबिभेदीदृङ्वै राष्ट्रं वि पर्यावर्तयतीति तस्य वज्रमादाय शीर्षाण्यच्छिनद्यथ्सोमपान- [१] मासीथ्स कपिञ्जलोऽभवद्यथ्सुरापानग्ं स कल विङ्को यदन्नादनग्ं स तित्तिरिस्तस्याऽञ्जलिना ब्रह्महत्यामुपाऽगृह्णात्तागृ्ं संवथ्सरमबिभस्तं भूतान्यभ्यक्रोशन्ब्रह्महन्निति स पृथिवीमुपाऽसीददस्यै ब्रह्महत्यायै तृतीयं प्रति गृहाणेति साऽब्रवीद्वरं वृणै खातात्पराभविष्यन्ती मन्ये ततो मा परा भूवमिति पुरा ते [२] संवथ्सरादपि रोहादित्यब्रवीत्तस्मात्पुरा संवथ्सरात्पृथिव्यै खातमपि रोहति वारेवृतग्ग् ह्यस्यै तृतीयं ब्रह्महत्यायै प्रत्यगृह्णात्तथ्स्वकृतमिरिणमभवत्तस्मादाहिताग्निः श्रद्धादेवः स्वकृत इरिणे नाऽव स्येद्ब्रह्महत्यायै ह्येष वर्णः स वनस्पतीनुपाऽसीददस्यै ब्रह्महत्यायै तृतीयं प्रति गृह्णीतेति तेऽब्रुवन्वरं वृणामहै वृक्णात्- [३] पराभविष्यन्तो मन्यामहे ततो मा परा भूमेत्यावृश्चनाद्वो भूयाग्ंस उत्तिष्ठानित्यब्रवीत्तस्मादावृश्चनाद्वृक्षाणां भूयाग्ंस उत्तिष्ठन्ति वारेवृतग्ग् ह्येषां तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन्थ्स निर्यासोऽभवत्तस्मान्निर्यासस्य नाऽऽश्यं ब्रह्महत्यायै ह्येष वर्णोऽथो खलु य एव लोहितो यो वाऽऽवृश्चनान्निर्येषति

तस्य नाऽऽश्यं [४] काममन्यस्य स स्त्रीषग्ंसादमुपाऽसीददस्यै ब्रह्महत्यायै तृतीयं प्रति गृह्णीतेति ता अब्रुवन्वरं वृणामहा ऋत्वियात्प्रजां विन्दामहै काममा विजनितोः सं भवामेति तस्मादृत्वियाथ्स्त्रियः प्रजां विन्दन्ते काममा विजनितोः सं भवन्ति वारेवृतग्ग् ह्यासां तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन्थ्सा मलवद्वासा अभवत्तस्मान्मलवद्वाससा न सं वदेत [५] न सहाऽऽसीत नाऽस्या अन्नमद्याद्ब्रह्महत्यायै ह्येषा वर्णं प्रतिमुच्याऽस्तेऽथो खल्वाहुरभ्यञ्जनं वाव स्त्रिया अन्नमभ्यञ्जनमेव न प्रतिगृह्यं काममन्यदिति यां मलवद्वाससग्ं सं भवन्ति यस्ततो जायते सोऽभिशस्तो यामरण्ये तस्यै स्तेनो यां पराचीं तस्यै ह्रीतमुख्यपगल्भो या स्नाति तस्या अप्सु मारुको या [६] ऽभ्यङ्क्ते तस्यै दुश्चर्मा या प्रलिखते तस्यै खलतिरपमारी याऽऽङ्क्ते तस्यै काणो या दतो धावते तस्यै श्यावदन् या नखानि निकृन्तते तस्यै कुनखी या कृणत्ति तस्यै क्लीबो या रज्जुग्ं सृजति तस्या उद्बन्धुको या पर्णेन पिबति तस्या उन्मादुको या खर्वेण पिबति तस्यै खर्वस्तिस्रो रात्रीर्व्रतं चरेदञ्जलिना वा पिबेदखर्वेण वा पात्रेण प्रजायै गोपीथाय॥[७]

यथ्सोमपानं ते वृक्णात्तस्य नाश्यं वदेत मारुको याऽखर्वेण वा त्रीणि च॥2.5.1॥

त्वष्टा हतपुत्रो वीन्द्रग्ं सोममाऽहरत्तस्मिन्निन्द्र उपहवमैच्छत तन्नोऽपाह्वयत पुत्रं मेऽवधीरिति स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत्तस्य यदत्यशिष्यत तत्त्वष्टाऽऽहवनीयमुप प्राऽवर्तयथ्स्वाहेन्द्रशत्रुर्वर्धस्वेति यदवर्तयत्तद्वृत्रस्य वृत्रत्वं यदब्रवीथ्स्वाहेन्द्रशत्रुर्वर्धस्वेति तस्मादस्ये- [८] न्द्रः शत्रुरभवथ्स सं भवन्नग्नीषोमावभि समभवथ्स इषुमात्रमिषुमात्रं विष्वङ्ङवर्धत स

इमाँल्लोकानवृणोद्यदिमाँल्लोकानवृणोत्तद्वृत्रस्य वृत्रत्वं तस्मादिन्द्रोऽबिभेथ्स
प्रजापतिमुपाऽधावच्छत्रुर्मेऽजनीति तस्मै वज्रग्ं सिक्त्वा प्राऽयच्छदेतेन जहीति
तेनाऽभ्यायत तावब्रूतामग्नीषोमौ मा [१] प्र हारावमन्तः स्व इति मम वै युवग्ग् स्थ
इत्यब्रवीन्मामभ्येतमिति तौ भागधेयमैच्छेतां ताभ्यामेतमग्नीषोमीयमेकादशकपालं
पूर्णमासे प्राऽयच्छत्तावब्रूतामभि संदष्टौ वै स्वो न शक्नुव ऐतुमिति स इन्द्र
आत्मनः शीतरूरावजनयत्तच्छीतरूरयोर्जन्म य एवग्ं शीतरूरयोर्जन्म वेद [१०]
नैनग्ं शीतरूरौ हतस्ताभ्यामेनमभ्यनयत्तस्माज्जञ्जभ्यमानादग्नीषोमौ निरक्रामतां
प्राणापानौ वा एनं तदजहितां प्राणो वै दक्षोऽपानः क्रतुस्तस्माज्जञ्जभ्यमानो
ब्रूयान्मयि दक्षक्रतू इति प्राणापानावेवाऽऽत्मन्धत्ते सर्वमायुरेति स देवता वृत्रान्निर्हूय
वार्त्रघ्नग्ं हविः पूर्णमासे निरवपद्घ्नन्ति वा एनं पूर्णमास आ- [११] ऽमावास्यायां
प्याययन्ति तस्माद्वार्त्रघ्नी पूर्णमासेऽनूच्येते वृधन्वती अमावास्यायां तथ्सग्ग् स्थाप्य
वार्त्रघ्नग्ंहविर्वज्रमादाय पुनरभ्यायत ते अब्रूतां द्यावापृथिवी मा प्र हारावयोर्वै श्रित
इति ते अब्रूतां वरं वृणावहै नक्षत्रविहिताऽहमसानीत्यसावब्रवीच्चित्रविहिताऽहमितीयं
तस्मान्नक्षत्रविहिताऽसौ चित्रविहितेऽयं य एवं द्यावापृथिव्यो- [१२] र्वरं वेदैनं वरो
गच्छति स आभ्यामेव प्रसूत इन्द्रो वृत्रमहन्ते देवा वृत्रग्ं हत्वाग्नीषोमावब्रुवन् हव्यं
नो वहतमिति तावब्रूतामपतेजसौ वै त्यौ वृत्रे वै त्ययोस्तेज इति तेऽब्रुवन्क
इदमच्छैतीति गौरित्यब्रुवन्गौर्वाव सर्वस्य मित्रमिति साऽब्रवी- [१३] त्वरं वृणै मय्येव
सतोऽभयेन भुनजाध्वा इति तद्गौराऽहरत्तस्माद्गवि सतोऽभयेन भुञ्जत एतद्वा
अग्नेस्तेजो यद्धृतमेतथ्सोमस्य यत्पयो य एवमग्नीषोमयोस्तेजो वेद तेजस्व्येव
भवति ब्रह्मवादिनो वदन्ति किंदेवत्यं पौर्णमासमिति प्राजापत्यमिति ब्रूयात्तेनेन्द्रं ज्येष्ठं

पुत्रं निरवासा-ययदिति तस्माज्ज्येष्ठं पुत्रं धनेन निरवसाययन्ति॥[१४]

अस्य मा वेदा द्यावापृथिव्योरब्रवीदिति तस्माच्चत्वारि च||2.5.2||

इन्द्रं वृत्रं जघ्निवाग्ंसं मृधोऽभि प्रावेपन्त स एतं वैमृधं पूर्णमासेऽनुनिर्वाप्यमपश्यत्तं निरवपत्तेन वै स मृधोऽपाऽहत यद्वैमृधः पूर्णमासेऽनुनिर्वाप्यो भवति मृध एव तेन यजमानोऽप हत इन्द्रो वृत्रग्ं हत्वा देवताभिश्चेन्द्रियेण च व्यार्ध्यत स एतमाग्नेयमष्टाकपालममावास्यायामपश्यदैन्द्रं दधि [१५] तं निरवपत्तेन वै स देवताश्चेन्द्रियं चावारुन्ध यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवत्यैन्द्रं दधि देवताश्चैव तेनेन्द्रियं च यजमानोऽव रुन्ध इन्द्रस्य वृत्रं जघ्नुष इन्द्रियं वीर्यं [१६] पृथिवीमनु व्यार्छत्तदोषधयो वीरुधोऽभवन्थ्स प्रजापतिमुपाऽधावद्वृत्रं मे जघ्नुष इन्द्रियं वीर्यं पृथिवीमनु व्यारत्तदोषधयो वीरुधोऽभूवन्निति स प्रजापतिः पशूनब्रवीदेतदस्मै सं नयतेति तत्पशव ओषधीभ्योऽध्यात्मन्थ्समनयन्तत्प्रत्यदुहन् यथ्समनयन्तथ्सां नाय्यस्य सान्नाय्यत्वं यत्प्रत्यदुहन्तत्प्रतिधुषः प्रतिधुक्त्वग्ं समनैषुः प्रत्यधुक्षन्न तु मयि श्रयत इत्यब्रवीदेतदस्मै [१७] शृतं कुरुतेत्यब्रवीत्तदस्मै शृतमकुर्वन्निन्द्रियं वावाऽस्मिन्वीर्यं तदश्रयन्तच्छृतस्य शृतत्वग्ं समनैषुः प्रत्यधुक्षङ्छृतमक्रन्न तु मा धिनोतीत्यब्रवीदेतदस्मै दधि कुरुतेत्यब्रवीत्तदस्मै दध्यकुर्वन्तदेनमधिनोत्तद्दध्नो दधित्वं ब्रह्मवादिनो वदन्ति दध्नः पूर्वस्यावदेयं [१८] दधि हि पूर्वं क्रियत इत्यनादृत्य तच्छृतस्यैव पूर्वस्याऽव द्येदिन्द्रियमेवाऽस्मिन्वीर्यग्ग् श्रित्वा दध्नोपरिष्टाद्धिनोति यथापूर्वमुपैति यत्पूतीकैर्वा पर्णवल्कैर्वाऽऽतञ्च्याथ्सौम्यं

तद्यत्क्वलै राक्षसं तद्यत्तण्डुलैर्वैश्वदेवं तद्यदातञ्चनेन मानुषं तद्यद्दध्ना तथ्सेन्द्रं दध्नाऽऽतनक्ति [१९] सेन्द्रत्वायाऽग्निहोत्रोच्छेषणमभ्यातनक्ति यज्ञस्य संतत्या इन्द्रो वृत्रग्ं हत्वा परां परावतमगच्छदपाऽराधमिति मन्यमानस्तं देवताः प्रैषमैच्छन्थ्सोऽब्रवीत्प्रजापतिर्यः प्रथमोऽनुविन्दति तस्य प्रथमं भागधेयमिति तं पितरोऽन्वविन्दन्तस्मात्पितृभ्यः पूर्वेद्युः क्रियते सोऽमावास्यां प्रत्याऽगच्छत्तं देवा अभि समगच्छन्ताऽमा वै नो [२०] ऽद्य वसु वसतीतीन्द्रो हि देवानां वसु तदमावास्याया अमावास्यत्वं ब्रह्मवादिनो वदन्ति किंदेवत्यग्ं सान्नाय्यमिति वैश्वदेवमिति ब्रूयाद्विश्वे हि तद्देवा भागधेयमभि समगच्छन्तेत्यथो खल्वैन्द्रमित्येव ब्रूयादिन्द्रं वाव ते तद्भिषज्यन्तोऽभि समगच्छन्तेति॥[२१]

दधि मे जघ्नष इन्द्रियं वीर्यमित्यब्रवीदेतदस्मा अवदेयं तनक्ति नो द्विचत्वारिग्ंशच्च॥2.5.3॥

ब्रह्मवादिनो वदन्ति स त्वै दर्शपूर्णमासौ यजेत य एनौ सेन्द्रौ यजेतेति वैमृधः पूर्णमासेऽनुनिर्वाप्यो भवति तेन पूर्णमासः सेन्द्र ऐन्द्रं दध्यमावास्यायां तेनाऽमावास्या सेन्द्रा य एवं विद्वान्दर्शपूर्णमासौ यजते सेन्द्रावेवैनौ यजते श्वःश्वोऽस्मा ईजानाय वसीयो भवति देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एता- [२२] मिष्टिमपश्यन्नाग्नावैष्णवमेकादशकपालग्ं सरस्वत्यै चरुग्ं सरस्वते चरुं तां पौर्णमासग्ं सग्ग्स्थाप्याऽनु निरवपन्ततो देवा अभवन्पराऽसुरा यो भ्रातृव्यवान्थ्स्याथ्स पौर्णमासग्ं सग्ग्स्थाप्यैतामिष्टिमनु निर्वपेत्पौर्णमासेनैव वज्रं भ्रातृव्याय प्रहृत्याऽऽग्नावैष्णवेन देवताश्च यज्ञं च भ्रातृव्यस्य वृङ्क्ते मिथुनान्पशून्थ्सारस्वताभ्यां यावदेवाऽस्याऽस्ति तत्- [२३] सर्वं वृङ्क्ते पौर्णमासीमेव

यजेत भ्रातृव्यवान्नाऽमावास्याग्ं हत्वा भ्रातृव्यन्नाऽऽ प्याययति साकं प्रस्थायीयेन यजेत पशुकामो यस्मै वा अल्पेनाऽऽहरन्ति नाऽऽत्मना तृप्यति नाऽन्यस्मै ददाति यस्मै महता तृप्यत्यात्मना ददात्यन्यस्मै महता पूर्णग्ं होतव्यं तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति दारुपात्रेण जुहोति न हि मृन्मयमाहुतिमानशे औदुम्बरं [२४] भवत्यूर्ग्वा उदुं बर ऊर्क्पशव ऊर्जैवाऽस्मा ऊर्जं पशूनव रुन्धे नाऽगतश्रीर्महेन्द्रं यजेत त्रयो वै गतश्रियः शुश्रुवान्ग्रामणी राजन्यस्तेषां महेन्द्रो देवता यो वै स्वां देवतामतियजते प्र स्वायै देवतायै च्यवते न परां प्राऽऽप्नोति पापीयान्भवति संवथ्सरमिन्द्रं यजेत संवथ्सरग्ं हि व्रतं नाऽति स्वै– [२५] वैनं देवतेज्यमाना भूत्या इन्धे वसीयान्भवति संवथ्सरस्य परस्तादग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेथ्संवथ्सरमेवैनं वृत्रं जघ्निवाग्ं समग्निर्व्रतपतिर्व्रतमा लम्भयति ततोऽधि कामं यजेत॥[२६]

एतां तदौदुंभरग्ग् स्वा त्रिग्ंशच्च॥2.5.4॥

नाऽसोमयाजी सं नयेदनागतं वा एतस्य पयो योऽसोमयाजी यदसोमयाजी सं नयेत्परिमोष एव सोऽनृतं करोत्यथो परैव सिच्यते सोमयाज्येव सं नयेत्पयो वै सोमः पयः सान्नाय्यं पयसैव पय आत्मन्धत्ते वि वा एतं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा [२७] अभ्युदेति त्रेधा तण्डुलान्वि भजेद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधग्ग्श्चरुं येऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमग्निरेवाऽस्मै प्रजां प्रजनयति वृद्धामिन्द्रः प्र यच्छति यज्ञो वै विष्णुः पशवः

शिपिर्यज्ञ एव पशुषु प्रति तिष्ठति न द्वे [२८] यजेत यत्पूर्वया सं प्रति यजेतोत्तरया छं बट्कुर्याद्यदुत्तरया सं प्रति यजेत पूर्वया छं बट्कुर्यान्नेष्टिर्भवति न यज्ञस्तदनु ह्रीत मुख्यपगल्भो जायत एकामेव यजेत प्रगल्भोऽस्य जायतेऽनादृत्य तद्द्वे एव यजेत यज्ञमुखमेव पूर्वयाऽऽलभते यजत उत्तरया देवता एव पूर्वयाऽऽवरुन्ध इन्द्रियमुत्तरया देवलोकमेव [२९] पूर्वयाऽभिजय तिमनुष्यलोकमुत्तरया भूयसो यज्ञक्रतूनुपैत्येषा वै सुमना नामेष्टिर्यमद्येजानं पश्चाच्चन्द्रमा अभ्युदेत्यस्मिन्नेवाऽस्मै लोकेऽर्धुकं भवति दाक्षायणयज्ञेन सुवर्गकामो यजेत पूर्णमासे सं नयेन्मैत्रावरुण्याऽऽमिक्षयाऽमावास्यायां यजेत पूर्णमासे वै देवानाग्ं सुतस्तेषामेतमर्धमासं प्रसुतस्तेषां मैत्रावरुणी वशाऽमावास्यायामनूबन्ध्या यत्- [३०] पूर्वेद्युर्यजते वेदिमेव तत्करोति यद्वथ्सानपाकरोति सदोहविर्धाने एव सं मिनोति यद्यजते देवैरेव सुत्याग्ं सं पादयति स एतमर्धमासग्ं सधमादं देवैः सोमं पिबति यन्मैत्रावरुण्याऽऽमिक्षयाऽमावास्यायां यजते यैवासौ देवानां वशाऽनूबन्ध्या सो एवैषैतस्य साक्षाद्वा एष देवानभ्यारोहति य एषां यज्ञं [३१] अभ्यारोहति यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति यद्यवविध्यति पापीयान्भवति यदि नाऽवविध्यति सदृङ्व्यावृत्काम एतेन यज्ञेन यजेत क्षुरपविर्ह्येष यज्ञस्ताजक्पुण्यो वा भवति प्र वा मीयते तस्यैतद्व्रतं नानृतं वदेन्न मागृं समश्नीयान्न स्त्रियमुपेयान्नास्य पल्पूलनेनवासः पल्पूलयेयुरेतद्धि देवाः सर्वं नकुर्वन्ति॥[३२]

चन्द्रमा द्वे देवलोकमेव यद्यज्ञं पल्पूलयेयुष्षट्च॥2.5.5॥

एष वै देवरथो यद्दर्शपूर्णमासौ यो दर्शपूर्णमासाविष्ट्वा सोमेन यजते रथस्पष्ट

एवाऽवसाने वरे देवानामव स्यत्येतानि वा अङ्गापरूग्ंषि संवथ्सरस्य यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजतेऽङ्गापरूग्ष्येव संवथ्सरस्य प्रति दधात्येते वै संवथ्सरस्य चक्षुषी यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते ताभ्यामेव सुवर्गं लोकमनु पश्य- [३३] त्येषा वै देवानां विक्रान्तिर्यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते देवानामेव विक्रान्तिमनु वि क्रमत एष वै देवयानः पन्था यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते य एव देवयानः पन्थास्तग्ं समारोहत्येतौ वै देवानाग्ं हरी यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते यावेव देवानाग्ं हरी ताभ्या- [३४] मेवैभ्यो हव्यं वहत्येतद्वै देवानामास्यं यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते साक्षादेव देवानामास्ये जुहोत्येष वै हविर्धानी यो दर्शपूर्णमासयाजी सायं प्रातरग्निहोत्रं जुहोति यजते दर्शपूर्णमासावहरहर्हविर्धानिनाग्ं सुतो य एवं विद्वान्दर्शपूर्णमासौ यजते हविर्धान्यस्मीति सर्वमेवाऽस्य बर्हिष्यं दत्तं भवति देवा वा अह- [३५] र्यज्ञियन्नाऽविन्दन्ते दर्शपूर्णमासावपुनन्तौ वा एतौ पूतौ मेध्यौ यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते पूतावेवैनौ मेध्यौ यजते नाऽमावास्यायां च पौर्णमास्यां च स्त्रियमुपेयाद्यदुपेयान्निरिन्द्रियः स्याथ्सोमस्य वै राज्ञोऽर्धमासस्य रात्रयः पत्नय आसन्तासाममावास्यां च पौर्णमासीं च नोपै- [३६] त्ते एनमभि समनह्येतां तं यक्ष्म आर्छद्राजानं यक्ष्म आरदिति तद्राजयक्ष्मस्य जन्म यत्पापीयानभवत्तत्पापयक्ष्मस्य यज्जायाभ्यामविन्दत्तज्जायेन्यस्य य एवमेतेषां यक्ष्माणां जन्म वेद नैनमेते यक्ष्मा विन्दन्ति स एते एव नमस्यन्नुपाधावत्ते अब्रूतां वरं वृणावहा आवं देवानां भागधे असावा- [३७] ऽऽवदधि देवा इज्यान्ता इति

तस्माथ्सदृशीनाग्ं रात्रीणाममावास्यायां च पौर्णमास्यां च देवा इज्यन्त एते हि देवानां भागधे भागधा अस्मै मनुष्या भवन्ति य एवं वेद भूतानि क्षुधमघ्नन्थ्सद्यो मनुष्या अर्धमासे देवा मासि पितरः संवथ्सरे वनस्पतयस्तस्मादहरहर्मनुष्या अशनमिच्छन्तेऽर्धमासे देवा इज्यन्ते मासि पितृभ्यः क्रियते संवथ्सरे वनस्पतयः फलं गृह्णन्ति य एवं वेद हन्ति क्षुधं भ्रातृव्यम्॥[३८]

पश्यति ताभ्यामहरैदसाव फलग्ं सप्त च||2.5.6||

देवा वै नर्चि न यजुष्यश्रयन्त ते सामन्नेवाऽश्रयन्त हिं करोति सामैवाऽकर्हिं करोति यत्रैव देवा अश्रयन्त तत एवैनान्प्र युङ्क्ते हिं करोति वाच एवैष योगो हिं करोति प्रजा एव तद्यजमानः सृजते त्रिः प्रथमामन्वाह त्रिरुत्तमां यज्ञस्यैव तद्ब्रस्ं [३९] नह्यत्यप्रस्रग्ंसाय संततमन्वाह प्राणानामन्नाद्यस्य संतत्या अथो रक्षसामपहत्यै राथंतरीं प्रथमामन्वाह राथंतरो वा अयं लोक इममेव लोकमभि जयति त्रिर्वि गृह्णाति त्रय इमे लोका इमानेव लोकानभि जयति बार्हतीमुत्तमामन्वाह बार्हतो वा असौ लोकोऽमुमेव लोकमभि जयति प्र वो [४०] वाजा इत्यनिरुक्तां प्राजापत्यामन्वाह यज्ञो वै प्रजापतिर्यज्ञमेव प्रजापतिमा रभते प्र वो वाजा इत्यन्वाहान्नं वै वाजोऽन्नमेवाऽव रुन्धे प्र वो वाजा इत्यन्वाह तस्मात्प्राचीनग्ं रेतो धीयतेऽग्न आ याहि वीतय इत्याह तस्मात्प्रतीचीः प्रजा जायन्ते प्र वो वाजा [४१] इत्यन्वाह मासा वै वाजा अर्धमासा अभिद्यवो देवा हविष्मन्तो गौर्घृताची यज्ञो देवाञ्जिगाति यजमानः सुम्नयुरिदमसीदमसीत्येव यज्ञस्य प्रियं धामाऽव रुन्धे यं कामयेत सर्वमायुरियादिति प्र वो वाजा इति तस्याऽनूच्याग्न आ याहि वीतय इति

सं ततमुत्तरमर्धर्चमा लभेत [४२] प्राणेनैवाऽस्याऽपानं दाधार सर्वमायुरेति यो वा अरत्निग्ं सामिधेनीनां वेदारत्नावेव भ्रातृव्यं कुरुतेऽर्धर्चौ सं दधात्येष वा अरत्निः सामिधेनीनां य एवं वेदाऽरत्नावेव भ्रातृव्यं कुरुत ऋषेर्ऋषेर्वा एता निर्मिता यथ्सामिधेन्यस्ता यदसंयुक्ताः स्युः प्रजया पशुभिर्यजमानस्य वि तिष्ठेरन्नर्धर्चौ संदधाति सं युनक्त्येवैनास्ता अस्मै संयुक्ता अवरुद्धाः सर्वमाशिषं दुह्हे॥[४३]

बर्सं वो जायन्ते प्र वो वाजा लभेत दधाति सन्दश च॥2.5.7॥

अयज्ञो वा एष योऽसामाऽग्न आ याहि वीतय इत्याह राथंतरस्यैष वर्णस्तं त्वा समिद्भिरङ्गिर इत्याह वामदेव्यस्यैष वर्णो बृहदग्ने सुवीर्यमित्याह बृहत एष वर्णो यदेतं तृचमन्वाह यज्ञमेव तथ्सामन्वन्तं करोत्यग्निरमुष्मिँल्लोक आसीदादित्योऽस्मिन्तावमौ लोकावशान्ता- [४४] वास्तां ते देवा अब्रुवन्नेतेमौ वि पर्यूहामेत्यग्न आ याहि वीतय इत्यस्मिँल्लोकेऽग्निमदधुर्बृहदग्ने सुवीर्यमित्यमुष्मिँल्लोक आदित्यं ततो वा इमौ लोकावशाम्यतां यदेवमन्वाहाऽनयोर्लोकयोः शान्त्यै शाम्यतोऽस्मा इमौ लोकौ य एवं वेद पञ्चदश सामिधेनीरन्वाह पञ्चदश [४५] वा अर्धमासस्य रात्रयोऽर्धमासशः संवथ्सर आप्यते तासां त्रीणि च शतानि षष्टिश्चाऽक्षराणि तावतीः संवथ्सरस्य रात्रयोऽक्षरश एव संवथ्सरमाप्नोति नृमेधश्च परुच्छेपश्च ब्रह्मवाद्यमवदेतामस्मिन्दारावार्द्रेऽग्निं जनयाव यतरो नौ ब्रह्मीयानिति नृमेधोऽभ्यवदथ्स धूममजनयत्परुच्छेपोऽभ्यवदथ्सोऽग्निमजनयदृष इत्यब्रवी- [४६] द्यथ्समावद्वि द्वकथा त्वमग्निमजीजनो नाऽहमिति सामिधेनीनामेवाऽहं वर्ण वेदेत्यब्रवीद्यद्धृतवत्पदमनूच्यते

स आसां वर्णस्तं त्वा समिद्भिरङ्गिर इत्याह सामिधेनीष्वेव तज्ज्योतिर्जनयति स्त्रियस्तेन यदृच स्त्रियस्तेन यद्गायत्रियः स्त्रियस्तेन यथ्सामिधेन्यो वृषण्वतीमन्वाह [४७] तेन पुग्ग्स्वतीस्तेन सेन्द्रास्तेन मिथुना अग्निर्देवानां दूत आसीदुशना काव्योऽसुराणां तौ प्रजापतिं प्रश्नमैताग्ं स प्रजापतिरग्निं दूतं वृणीमह इत्यभि पर्यावर्तत ततो देवा अभवन्पराऽसुरा यस्यैवं विदुषोऽग्निं दूतं वृणीमह इत्यन्वाह भवत्यात्मना परास्य भ्रातृव्यो भवत्यध्वरवतीमन्वाह भ्रातृव्यमेवैतया [४८] ध्वरति शोचिष्केशस्तमीमह इत्याह पवित्रमेवैतद्यजमानमेवैतया पवयति समिद्धो अग्न आहुतेत्याह परिधिमेवैतं परि दधात्यस्कन्दाय यदत ऊर्ध्वमभ्यादध्याद्यथा बहिः परिधि स्कन्दति तादृगेव तत्त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितृणाग्ं सहरक्षा असुराणां त एतर्ह्या शग्ंसन्ते मां वरिष्यते मा- [४९] मिति वृणीध्वग्ं हव्यवाहनमित्याह य एव देवानां तं वृणीत आर्षेयं वृणीते बन्धोरेव नैत्यथो संतत्यै परस्तादर्वाचो वृणीते तस्मात्परस्तादर्वाञ्चो मनुष्यान्पितरोऽनु प्र पिपते॥[५०]

आशान्तावाह पञ्चदशाऽब्रवीदनावाहैतया वरिष्यते मामेकान्न त्रिग्ंशच्च॥2.5.8॥

अग्ने महाग्ं असीत्याह महान् ह्येष यदग्निर्ब्राह्मणेत्याह ब्राह्मणो ह्येष भारतेत्याहैष हि देवेभ्यो हव्यं भरति देवेद्ध इत्याह देवा ह्येतमैन्धत मन्विद्ध इत्याह मनुर्ह्येतमुत्तरो देवेभ्य ऐन्धर्षिष्टुत इत्याहर्षयो ह्येतमस्तुवन्विप्रानुमदित इत्याह [५१] विप्रा ह्येते यच्छुश्रुवाग्ंसः कविशस्त इत्याह कवयो ह्येते यच्छुश्रुवाग्ंसो ब्रह्मसग्ंशित इत्याह ब्रह्मसग्ंशितो ह्येष घृताहवन इत्याह घृताहुतिर्ह्यस्य प्रियतमा

प्रणीर्यज्ञानामित्याह प्रणीर्ह्येष यज्ञानाग्ं रथीरध्वराणामित्याहैष हि देवरथोऽतूर्तो होतेत्याह न ह्येतं कश्चन [५२] तरति तूर्णिर्हव्यवाडित्याह सर्वग्ग् ह्येष तरत्यास्पात्रं जुहूर्देवानामित्याह जुहूर्ह्येष देवानां चमसो देवपान इत्याह चमसो ह्येष देवपानोऽराग्ं इवाग्ने नेमिर्देवाग् स्त्वं परिधूरसीत्याह देवान् ह्येष परिभूर्यद्ब्रूयादा वह देवान्देवयते यजमानायेति भ्रातृव्यमस्मै [५३] जनयेदा वह देवान् यजमानायेत्याह यजमानमेवैतेन वर्धयत्यग्निमग्न आ वह सोममा वहेत्याह देवता एव तद्यथापूर्वमुप ह्वयत आ चाऽग्ने देवान्वह सुयजा च यज जातवेद इत्याहाग्निमेव तथ्सग्ग् श्यति सोऽस्य सग्ंशितो देवेभ्यो हव्यं वहत्यग्निर्होते- [५४] त्याहाऽग्निर्वै देवानाग्ं होता य एव देवानाग्ं होता तं वृणीते स्मो वयमित्याहाऽऽत्मानमेव सत्त्वं गमयति साधु ते यजमान देवतेत्याहाऽऽशिषमेवैतामा शास्ते यद्ब्रूयाद्योऽग्निग्ं होतारमवृथा इत्यग्निनोऽभयतो यजमानं परि गृह्णीयात्प्रमायुकः स्याद्यजमानदेवत्या वै जुहूर्भ्रातृव्यदेवत्योऽपभृ- [५५] द्यद्द्वे इव ब्रूयाद्भ्रातृव्यमस्मै जनयेद्धृतवतीमध्वर्यो स्रुचमाऽस्यस्वेत्याह यजमानमेवैतेन वर्धयति देवायुवमित्याह देवान् ह्येषाऽवति विश्ववारामित्याह विश्वग्ग् ह्येषाऽवतीडामहै देवाग्ं ईडेन्यान्नमस्याम नमस्यान् यजाम यज्ञियानित्याह मनुष्या वा ईडेन्याः पितरो नमस्या देवा यज्ञिया देवता एव तद्यथाभागं यजति॥[५६]

विप्रानुमदित इत्याह चनाऽस्मै होतापभृद्देवता एव त्रीणि च ||**2.5.9**||

त्रीग्स्तृचाननु ब्रूयाद्राजन्यस्य त्रयो वा अन्ये राजन्यात्पुरुषा ब्राह्मणो वैश्यः शूद्रस्तानेवाऽस्मा अनुकान्करोति पञ्चदशाऽनु ब्रूयाद्राजन्यस्य पञ्चदशो वै राजन्यः

स्व एवैनग्ग् स्तोमे प्रतिष्ठापयति तृष्टुभा परि दध्यादिन्द्रियं वै त्रिष्टुगिन्द्रियकामः खलु वै राजन्यो यजते त्रिष्टुभैवाऽस्मा इन्द्रियं परि गृह्णाति यदि कामयेत [५७] ब्रह्मवर्चसमस्त्विति गायत्रिया परि दध्याद्ब्रह्मवर्चसं वै गायत्री ब्रह्मवर्चसमेव भवति सप्तदशाऽनु ब्रूयाद्वैश्यस्य सप्तदशो वै वैश्यः स्व एवैनग्ग् स्तोमे प्रतिष्ठापयति जगत्या परि दध्याज्जागता वै पशवः पशुकामः खलु वै वैश्यो यजते ज्जगत्यैवाऽस्मै पशून्परि गृह्णात्येकविग्ंशतिमनु ब्रूयात्प्रतिष्ठाकामस्यैकविग्ंशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्यै [५८] चतुर्विग्ंशतिमनु ब्रूयाद्ब्रह्मवर्चसकामस्य चतुर्विग्ंशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैवाऽस्मै ब्रह्मवर्चसमव रुन्धे त्रिग्ंशतमनु ब्रूयादन्नकामस्य त्रिग्ंशदक्षरा विराडन्नं विराड्विराजैवाऽस्मा अन्नाद्यमव रुन्धे द्वात्रिग्ंशतमनु ब्रूयात्प्रतिष्ठाकामस्य द्वात्रिग्ंशदक्षरानुष्टुगनुष्टुप्छन्दसां प्रतिष्ठा प्रतिष्ठित्यै षट्त्रिग्ंशतमनु ब्रूयात्पशुकामस्य षट्त्रिग्ंशदक्षरा बृहती बार्हताः पशवो बृहत्यैवाऽस्मै पशू- [५९] नव रुन्धे चतुश्चत्वारिग्ंशतमनु ब्रूयादिन्द्रियकामस्य चतुश्चत्वारिग्ंशदक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुप्त्रिष्टुभैवाऽस्मा इन्द्रियमव रुन्धेऽष्टाचत्वारिग्ंशतमनु ब्रूयात्पशुकामस्याऽष्टाचत्वारिग्ंशदक्षरा जगती जागताः पशवो जगत्यैवाऽस्मै पशूनव रुन्धे सर्वाणि छन्दाग् स्यनु ब्रूयाद्बहुयाजिनः सर्वाणि वा एतस्य छन्दाग् स्यवरुन्धानि यो बहुयाज्यपरिमितमनु ब्रूयादपरिमितस्यावरुद्ध्यै॥ [६०]

कामयेत प्रतिष्ठित्यै पशून्थ्सप्त चत्वारिग्ंशच्च॥2.5.10॥

निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानामुप व्ययते देवलक्ष्ममेव

तत्कुरुते तिष्ठन्नन्वाह तिष्ठन् ह्याश्रुततरं वदति तिष्ठन्नन्वाह सुवर्गस्य लोकस्याऽभिजित्या आसीनो यजत्यस्मिन्नेव लोके प्रति तिष्ठति यत्क्रौञ्चमन्वाहाऽऽसुरं तद्यन्मन्द्रं मानुषं तद्यदन्तरा तथ्सदेवमन्तराऽनूच्यगूं सदेवत्वाय विद्वाग्ंसो वै [६१] पुरा होतारोऽभूवन्तस्माद्विधृता अध्वानोऽभूवन्न पन्थानः समरुक्षन्नन्तर्वेद्यन्यः पादो भवति बहिर्वेद्यन्योऽथाऽन्वाहाऽध्वनां विधृत्यै पथामसग्ंरोहायाऽथो भूतं चैव भविष्यच्चाऽव रुन्धेऽथो परिमितं चैवाऽपरिमितं चाऽव रुन्धेऽथो ग्राम्याग्श्चैव पशूनारण्याग्श्चाऽव रुन्धेऽथो [६२] देवलोकं चैव मनुष्यलोकं चाऽभि जयति देवा वै सामिधेनीरनूच्य यज्ञं नाऽन्वपश्यन्थ्स प्रजापतिस्तूष्णीमाघारमाऽघारयत्ततो वै देवा यज्ञमन्वपश्यन् यत्तूष्णीमाघारमाघारयति यज्ञस्याऽनुख्यात्या अथो सामिधेनीरेवाऽभ्यनक्त्यलूक्षो भवति य एवं वेदाऽथो तर्पयत्येवैनास्तृप्यति प्रजया पशुभि- [६३] र्य एवं वेद यदेकयाऽऽघारयेदेकां प्रीणीयाद्यद्वाभ्यां द्वे प्रीणीयाद्यत्तिसृभिरति तद्रेचयेन्मनसाऽऽ घारयति मनसा ह्यनाप्तमाप्यते तिर्यञ्चमा घारयत्यछं बट्कारं वाक्च मनश्चाऽऽर्तीयेतामहं देवेभ्यो हव्यं वहामीति वागब्रवीदहं देवेभ्य इति मनस्तौ प्रजापतिं प्रश्नमैताग्ं सोऽब्रवीत् [६४] प्रजापतिर्दूतीरेव त्वं मनसोऽसि यद्धि मनसा ध्यायति तद्वाचा वदतीति तत्खलु तुभ्यं न वाचा जुहवन्नित्यब्रवीत्तस्मान्मनसा प्रजापतये जुह्वति मन इव हि प्रजापतिः प्रजापतेराप्त्यै परिधीन्थ्सं मार्ष्टि पुनात्येवैनान्त्रिर्मध्यमं त्रयो वै प्राणाः प्राणनेवाऽभि जयति त्रिर्दक्षिणार्ध्यं त्रय [६५] इमे लोका इमानेव लोकानभि जयति त्रिरुत्तरार्ध्यं त्रयो वै देवयानाः पन्थानस्तानेवाभि जयति त्रिरुप वाजयति त्रयो वै देवलोका देवलोकानेवाऽभि जयति द्वादश सं पद्यन्ते द्वादश मासाः संवथ्सरः संवथ्सरमेव

प्रीणात्यथो संवथ्सरमेवाऽस्मा उप दधाति सुवर्गस्य लोकस्य समष्ट्या आघारमा घारयति तिर इव [६६] वै सुवर्गो लोकः सुवर्गमेवाऽस्मै लोकं प्र रोचयत्यृजुमा घारयत्यृजुरिव हि प्राणः संततमा घारयति प्राणानामन्नाद्यस्य संतत्या अथो रक्षसामपहत्यै यं कामयेत प्रमायुकः स्यादिति जिह्मं तस्याऽऽ घारयेत्प्राणमेवाऽस्माज्जिह्मं नयति ताजक्प्र मीयते शिरो वा एतद्यज्ञस्य यदाघार आत्मा ध्रुवा- [६७] ऽऽघारमाघार्य ध्रुवाग्ं समनक्त्यात्मन्नेव यज्ञस्य शिरः प्रति दधात्यग्निर्देवानां दूत आसीद्दैव्योऽसुराणां तौ प्रजापतिं प्रश्नमैताग्ं स प्रजापतिर्ब्राह्मणमब्रवीदेतद्वि ब्रूहीत्या श्रावयेतीदं देवाः शृणुतेति वाव तदब्रवीदग्निर्देवो होतेति य एव देवानां तमवृणीत ततो देवा [६८] अभवन्पराऽसुरा यस्यैवं विदुषः प्रवरं प्रवृणते भवत्यात्मना परास्य भ्रातृव्यो भवति यद्ब्राह्मणश्चाऽब्राह्मणश्च प्रश्नमेयातां ब्राह्मणायाऽधि ब्रूयाद्यद्ब्राह्मणायाऽध्याहाऽऽत्मनेऽध्याह यद्ब्राह्मणं पराहाऽऽत्मानं पराऽऽह तस्माद्ब्राह्मणो न परोच्यः॥[६९]

वा आरण्याग्श्चाव रुन्धेऽथो पशुभिः सोऽब्रवीद्दक्षिणार्ध्यं त्रय इव ध्रुवा देवाश्चत्वारिग्ंशच्च॥2.5.11॥

आयुष्ट आयुर्दा अग्न आ प्यायस्व सन्तेऽव ते हेड उदुत्तमं प्र णो देव्या नो दिवोऽग्नाविष्णू अग्नाविष्णू इमं मे वरुण तत्त्वा याम्युदु त्यं चित्रम्॥ अपां नपादा ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः। तस्य ज्येष्ठं महिमानं वहन्तीर्हिरण्यवर्णाः परि यन्ति यह्वीः॥ स- [७०] मन्या यन्त्युप यन्त्यन्याः समानमूर्वं नद्यः पृणन्ति। तमू शुचिग्ं शुचयो दीदिवाग्ंसमपां नपातं परि

तस्थुरापः॥ तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः। स शुक्रेण शिक्वना रेवदग्निर्दीदायाऽनिध्मो घृतनिर्णिगप्सु॥ इन्द्रावरुणयोरहगं्ँ सम्राजोरव आ वृणे। ता नो मृडात ईदृशे॥ इन्द्रावरुणा युवमध्वराय नो [७१] विशे जनाय महि शर्म यच्छतम्। दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः॥ आ नो मित्रावरुणा प्र बाहवा। त्वं नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽव या सिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाग्ंसि प्रमुमुग्ध्यस्मत्॥ स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ। अव यक्ष्व नो वरुणगं्ँ [७२] रराणो वीहि मृडीकगं्ँ सुहवो न एधि॥ प्रप्रायमग्निर्भरतस्य शृण्वे वि यथ्सूर्यो न रोचते बृहद्भाः। अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः॥ प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वन्द्यो नो हवेषु। धन्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्न राजन्न्॥[७३] वि पाजसा वि ज्योतिषा॥ स त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः। उरुक्षयेषु दीद्यत्॥ तगं्ँ सुप्रतीकगं्ँ सुदृशग्ग्ँ स्वञ्चमविद्वाग्ंसो विदुष्टरगं्ँ सपेम। स यक्षद्विश्वा वयुनानि विद्वान्प्र हव्यमग्निरमृतेषु वोचत्॥ अगं्ँहोमुचे विवेष यन्मा वि न इन्द्रेन्द्र क्षत्रमिन्द्रियाणि शतक्रतोऽनु ते दायि॥[७४]

*यह्वीस्समध्वराय नो वरुणगं्ँ राजग्ग् श्चतुश्चत्वारिग्ंशच्च॥**2.5.12***॥

*विश्व रूपस्त्वष्टेन्द्रं वृत्रं ब्रह्मवादिनस्स त्वै नाऽसोमयाज्येष वै देवरथो देवा वै नर्चि नाऽयज्ञोऽग्ने महान्त्रीन्निवीतमायुष्टे द्वादश॥**12***॥

विश्वरूपो नैनगं्ँ शीतरूरावद्य वसु पूर्वेद्युर्वाजा इत्यग्ने महान्निवीतमन्या यन्ति चतुस्सप्ततिः॥७४॥

विश्वरूपोऽनु ते दायि॥

॥ हरिः ओम्॥

॥ श्री कृष्णार्पणमस्तु॥

॥ इति द्वितीयकाण्डे पञ्चमः प्रश्नः॥